क्रम सं०

विषय: कर्मकाण्डम्

प्रवेश सं०

ग्रन्थकार

नाम अहोई व्रतविधि:

पत्र सं० १—२

अक्षर सं० (पंक्ति) ३४ पंक्ति सं० (पृष्ठ) १८

श्लोक सं०

लिपि: दे.ना.

आधार कागज.

आकार १०.५" x ५.५"

003113

वि० विवरण पूर्ण

आ. ५४९६

बी० एस० मु० पी०—७७ एस० सी० ई०—१९५१—५० ०००

Indira Gandhi National Centre for the Arts

श्रियः

ॐ श्रीगणेशाय नमः ॥ श्रीपृथुरुवाच ॥ देवर्षे वदतां श्रेष्ठ सर्ववेदार्थयोगवित् ॥ न त्वां
प्रष्टुमिच्छामि त्वतः सन्देहच्छेदकारकः ॥ तादृशं व्रतमाख्याहि यत्र धनवर्द्धनं ॥
पुण्यं च भास्करं सर्वलोकस्य हितकारकम् ॥ २ ॥ श्रीनारद उवाच ॥ शृणु राजन् परं
गुह्यं व्रतानामुत्तमं व्रतं ॥ ततोऽहं संप्रवक्ष्यामि धनपुत्रविवर्द्धनम् ॥ ३ ॥ महावि
द्या महामाया महामेधा महास्मृतिः ॥ महामोहा भगवती महादेवी महेश्वरी ॥ ४ ॥
तस्या व्रतं महापुण्यं सर्वलोकहितप्रदं ॥ श्रीपृथुरुवाच ॥ अहो नामसा देवी कथं
जाता च नारद ॥ तस्या व्रतं तिथौ कस्यां को विधिस्तु कथं स्मृतं ॥ ५ ॥ श्रीनारद उवाच ॥
आसीत्पुरा कलियुगेऽकालमृत्युर्नराधिप ॥ ततो नराश्च पशवो पादपाश्च लयं
गताः ॥ ६ ॥ जनपदश्च तदा सर्वे तपस्या ताश्च भूरिशः ॥ बीजमात्राणि भूतानि य
दभूवन्नराधिप ॥ ७ ॥ तदा सर्वे समागम्य ब्राह्मणान् वेदपारगान् ॥ पप्रच्छुर्वन
तान् भूत्वा किं करणीयं हि नो द्विजाः ॥ ८ ॥ ब्राह्मणा वेदविद्वांसो विचार्य्य च मुहु
र्मुहुः ॥ शास्त्राण्यालोक्य तत्त्वज्ञाः कालमृत्युशमं प्रच ॥ ९ ॥ अहोरात्रं च महा
देव्याश्चाराधनमकुर्वत ॥ कार्त्तिके कृष्णपक्षस्य सप्तम्यां ध्यानतत्पराः ॥ १० ॥
दिनं निन्युर्महाराज व्रतनियमपरायणाः ॥ ततः प्रदोषसमये भवन्सर्वे पिचा
तराः ॥ ११ ॥ अथागाच्च तदा तत्र कश्चिज्जीवरक्षोषिता ॥ प्रोवाच ब्राह्मणान् दृष्ट्वा
किमर्थं व्रतमुपास्यते ॥ १२ ॥ उक्ते चु तां नरश्रेष्ठ अकालमृत्युहराय च ॥ प्रो
क्ता च सत्यमित्येवं सापि तत्र समोऽस्ददत ॥ १३ ॥ ततः सर्वे द्विजा विप्राः सा

अहोई
२
रा

धीवरयोषिता॥ अहोय्यास्य महादेव्या रूपमाराधनं दधुः॥१४॥ एतस्मिन्नेव का
लेतु देवी साक्षाद्दृश्यत॥ चामुंडा मुंडहस्ता च कराला कुसुमवर्णिनी॥१५॥ कालि
केति समाख्याता त्वहोई तत्र विश्रुता॥ एकाहैव प्रसन्नत्वादहोई नाम ते ब्रुवन्॥१६॥
सा पितत्र समासीना ब्राह्मणादीनभाषत॥ अहो रुद्रगणैः सार्द्धं सत्यकाले समन्विता॥
१७॥ विहार्थं समायाता विश्वपापमवेदय च॥ अद्य विप्रा वेदहीना वहुश्शो निर्धनस्तस्मार त
श्रया॥१८॥ अरतिकाः वत्रियाश्च वेश्या दुष्टाश्च पापजाः॥ स्त्रियः पतिप्रतिकू
लिन्यः स्वेच्छ धर्मसमन्विताः॥१९॥ एतत्समीक्ष्य पापस्य गतिं घोरां भयावहां॥
निर्धर्मकां च निर्यज्ञां निहो... र्जकां तथा॥२०॥ आगताः स्वगणैः सार्द्धं वि
श्वामावाय्य केवले॥ अद्य वै कार्त्तिके मासि नियमादि फलकोटिभिः॥ सप्तम्यां
तु विशेषेण पूजिता कोटिजोत्तमाः॥ अन्नादमागता विप्राश्चरं चणत्तमाचिरं॥
॥२२॥ ततः सकले लोकाश्च प्रार्थयंति समंततः नृप॥ दुर्भिक्षं भव दुश्चिन्तितं कश्च भ
वेत्क्वचित्॥२३॥ नाकालमृत्युर्न व्याधिर्न वै पुत्र त्वमेव च॥ श्रीनारदोवाच॥
ततो ब्रवीन्महादेवी श्रृणुध्वं द्विजोत्तमाः॥२४॥ कार्तिके कृष्णपक्षे च त्वष्टम्यां च
विशेषतः॥ ताराणां क्ते चंदनं क्ते नक्तमध्ये वाथ पूजयेत्॥२५॥ कर्तव्यं च विशेषेण
सप्तम्यां वा व्रतं मम॥ चंदनं क्ते च सप्तम्या अष्टम्यां च नक्तके॥२६॥ अवश्यं हि
व्रतं कार्यं नरनारीभिरेव च॥ दिवा वा नक्तमोक्तव्यं वालवृद्धातुरैर्विना॥२७॥ प्रति
साय प्रपूजयेत् त्वाग्नाहोई त्वेवं द्वि मासधी॥ कर्तव्या हि वयत्नेन मदीया प्रति
मानवैः॥२८॥ गृहस्थैः पूजनीया हि मृण्मयलेपनैः॥ तत्र कुड्ये च तां मेवा मं

चतुर्वर्णाश्च सर्वांगैः श्यावपीतैः सितासितैः॥ तत्र संपूजयेन्मां वै चंद्रिकामंडके
वरे॥३०॥ संध्यायां सनपुष्पैश्च धूपैर्दीपैस्तथैव च॥ मूलिकाभिस्तथा कूदैस्तथैवला
मि वचः॥३१॥ एवं कृत्वा नरैः सर्वैः सर्वं सुखमवाप्यते॥ नाकालमृत्युर्न व्याधि
र्न दुर्भिक्षं क्वचिद्भवेत्॥३२॥ यतो न या पूजया स्यात् प्राप्य तु गणौ समं॥ तथैव त्व
त्तो ततः सर्वं तद्वृतं जगदुर्न्नृप॥३३॥ ततस्तु प्रांजलिर्भूत्वा सा हि धीवरयोषिता॥
त्वं महादेवि देवेशो पाध्यस्मान्नीचयेन्निगान्॥३४॥ ततो ब्रवीन्महादेवी त्वहोई
विश्रुता च या॥ सतितवं मतः हि प्रसन्ना ते न संशयः॥३५॥ त्वया प्यहं सदा पूज्या
पूर्वोक्तेन विधानतः॥ पूजावसाने भवतीं संतति पूजयेत् स्वयं॥३६॥ तस्य पूजा
च सफला विपरीतमतान्यथा॥ तथा पूज्या कुमार्यश्च मालिनी च नर्थेरा॥३७॥
श्रीनारद उवाच॥ एवं प्रोच्य ततः पश्चात् तत्रैवांतर्दधे नृप॥ ततः सर्वैः गृह
ते च व्रतमेतन्न संशयः॥३८॥ अधुना ते मया प्रोक्तं तव स्नेहस्य कारणात्॥
गृहस्थवासिभिर्जीवैरवश्यं कव्रतं त्विदं॥३९॥ ये कुर्युर्व्रतमेतद्धि तेषां
सौख्यं भवेद्ध्रुवम्॥ न कालमृत्युर्न व्याधिर्न भयं नृप प्राप्नुतः॥४०॥ सप्तमी
चाष्टमी वापि तिथिरस्य व्रतस्य हि॥ सप्तमी चंदनं क्ते तु ताराणां क्ते तु चाष्टमी॥४१॥
उभावेव समानौ हि व्रतौ तौ ति पुभवे नृप॥ एतत्ते सर्वमाख्यातं यन्मां त्वां परिपृ
च्छति॥ अहोय्याश्च व्रतं जन्म प्रसादश्च विधिस्तिथिः॥ ... अहोई व्रतविधिः
समाप्तः शुभं

...National
Centre for the Arts

ग्रहोई
२

(२०८२)

ऽ१:॥२ॐ
वा

Indira Gandhi National
Centre for the Arts